दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-345 | 1 | अक्तूबर, 10 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com


**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् कार्तिककृष्णचतुर्थी
आश्विन २४ प्रविष्टांशः मङ्गलमयः भवेत्


2 हिमाचले संपर्कमार्गाणां पुनर्स्थापनायाः अनन्तरमेव पंचायतीराजसंस्थानां निर्वाचनम् भविष्यति, आदेशाः निर्गताः

3 पत्रालयः पत्राणि एव न वितरति मनांसि अपि संयोजयति - आचार्यः ललितकुमार अवस्थी

4 करकचतुर्थी : श्रद्धायाः प्रेमस्य च प्रतीकः


## सुभाषितम्

**एवं चात्यन्तशीलानां, ससत्वानां जितक्रुधाम्।
तुष्टयैवाचिन्तिता एव, स्वयमायान्ति सम्पदः।।**

जो व्यक्ति अत्यन्त शीलवान और सात्विक प्रवृत्ति के होते हैं, जिन्होंने क्रोध, संतुष्टि और चिन्ता की भावनाओं को अपने वश में कर लिया हो, धन और समृद्धि उनके पास स्वयं ही आ जाती है।

## निर्वाचनायोगेन राजनीतिकदलानि बिहार-विधानसभायाः आगामिषु निर्वाचनेषु प्रचारावधौ कृत्रिम-बुद्धिमत्तायाः उपयोगं न कर्तुं निर्दिष्टानि



हिमसंस्कृतवार्ताः - निर्वाचनायोगेन राजनीतिकदलानि निर्दिष्टानि सन्ति यत् तानि बिहार-विधानसभायाः आगामिषु निर्वाचनेषु विधानसभायाः उपनिर्वाचनेषु च प्रचारावधौ प्रतिद्वंद्वि-दलानि प्रत्याशिनः च विरुध्य आर्टिफिशियल इंटेलिजेंस इति कृत्रिम बुद्धिमत्तायाः उपयोगं न कुर्युः। इमे दिशानिर्देशाः आदर्शाचार-संहितायाः अन्तर्गतं प्रख्यापिताः सन्ति। आयोगेन सामाजिकसंदेशपटलेषु अन्येषु विविधविज्ञापनेषु च सूचनाः विकृतं कुर्वन्ती भ्रामकसूचनां प्रसारयन्ती च उपकरणानि विरुध्य संचेतना प्रदत्ता अस्ति

## मध्यप्रदेशस्य विशेषान्वेषण-दलेन तमिलनाडु-आरक्षकदलेन च श्रीशन-फ़ार्मेसी-संस्थायाः स्वामी जी. रङ्गनाथनं निगडितः

हिमसंस्कृतवार्ताः - मध्यप्रदेशस्य विशेषान्वेषण-दलेन तमिलनाडु-आरक्षकदलेन च काञ्चीपुरमक्षेत्रे श्रीशन-फ़ार्मेसी-संस्थायाः स्वामी जी. रङ्गनाथन इत्येषः विषाक्त-कफरोधक-औषध-निर्माणार्थं निगडितः। अस्य औषधस्य सेवनेन तावत् राजस्थान-मध्यप्रदेशयोः बहवः बालकाः मृत्युमुपगताः। मध्यप्रदेशस्य विशेषान्वेषण-दलेन राज्य-आरक्षकैश्च सः चेन्नई नगरस्य कोडम्बक्कमस्थलात् तस्य आवासात् निगृहीतः। छिन्दवाडा-बैतूल-जनपदयोः एतावता विषयुक्तेन कफरोधक-औषधेन त्रयोविंशति-बालकाः मृताः।

## साहित्यस्य नोबेल-पुरस्कारः घोषितः

हिमसंस्कृतवार्ताः - हङ्गेरियन्-उपन्यासकारः पटकथा लेखकः च लास्ज़लो-क्रास्ज़नाहोरकाई इत्येषः पञ्चविंशत्युत्तर-द्विसहस्रतमवर्षस्य साहित्यस्य नोबेल पुरस्कारं प्राप्तवान्।

## प्रधानमंत्री नरेंद्रमोदी ब्रिटेनस्य प्रधानमन्त्री कीर-स्टारमर इत्यसौ च प्रौद्योगिकी, रक्षा, कृत्रिम बुद्धिमत्ता, चेत्यादिषु विषयेषु विशद-चर्चाम् अकरुताम्



हिमसंस्कृतवार्ताः - प्रधानमंत्री नरेंद्रमोदी तस्य समकक्षीयः ब्रिटेनस्य प्रधानमन्त्री कीर-स्टारमर इत्यसौ च प्रौद्योगिकी, रक्षा, कृत्रिम-बुद्धिमत्ता, सतत-विकास, नवीकरणीयोर्जा चेत्यादिभिः विषयैः अन्यविशिष्ट-विषयेषु विशद-चर्चाम् अकरुताम्। द्वयोः मध्ये मुम्बय्यां प्रतिनिधिमंडलस्तरीया वार्ता अभवत्। मुम्बय्यां ब्रिटेनस्य प्रधानमंत्रिणा कीर-स्टारमरः इत्यनेन सह एकं संयुक्त-वार्ताहर-सम्मेलनम् सम्बोधयन् श्री मोदी प्रोक्तवान् यत् द्वावेव देशौ वैश्विकस्थिरतायै आर्थिकप्रगत्यै च प्रतिबद्धौ स्तः। भारत-ब्रिटेनयोः मध्ये व्यापकार्थिकं व्यापारिकं च साहमत्यं प्रकाशयन् श्रीमोदी प्रोक्तवान् यत् अनेन युवानः आजीविकायाः नवीनावसरान् लप्स्यन्ते द्वयोः देशयोर्मध्ये च व्यापारस्य विस्तारो भविष्यति। ब्रिटेनस्य प्रधानमंत्री कीर-स्टारमरः अकथयत् यत् भारत-ब्रिटेनदेशौ भविष्याधारितस्य एकस्य आधुनिक-सहकार्यस्य निर्माणं कुर्वन्तौ स्तः। भारत-ब्रिटेन-व्यापकार्थिक-व्यापारिक-सन्धिः ऐतिहासिकी अस्ति इति सम्बोधयन् श्री-स्टारमरः अकथयत् यत् टैरिफ शुल्केषु अपचित्या परस्पर-व्यापारिकापणेषु सक्रियभूमिकावर्धनेन च विकासोन्मुखा गतिः भविष्यति आजीविकायाः नवीनावसराः च उत्पत्स्यन्ते। अनन्तरं प्रधानमंत्री नरेंद्रमोदी स्वकीयेन ब्रिटिश-समकक्षेन कीर-स्टारमरः इत्यनेन सह सीईओ-फोरम इत्येतत् संबोधितम् अकरोत्। अस्मिन् अवसरे श्री-मोदी प्रोक्तवान् यत् एतत् वर्षम् अभूतपूर्वम् अस्ति यदा वैश्विकानिश्चिततायाः मध्ये भारत-ब्रिटेनदेशयोः सम्बन्धाः स्थिराः सुदृढाः चाभवन्।

## भारत-ऑस्ट्रेलियादेशयोः मध्ये सेनयोः सुदृढीकरणम् उद्दिश्य महत्वपूर्ण-रक्षा-सन्धिषु हस्ताक्षरं जातम्



हिमसंस्कृतवार्ताः - रक्षामन्त्रिणः राजनाथसिंहस्य ऑस्ट्रेलिया-यात्रावधौ भारत ऑस्ट्रेलियादेशौ महत्वपूर्ण-रक्षा-सन्धिषु हस्ताक्षरं कृतवन्तौ। राजनाथसिंहेन ऑस्ट्रेलियायाः उपप्रधानमन्त्रिणः एवं रक्षामन्त्रिणः रिचर्ड-मार्लेस इत्यस्य उपस्थितौ एतेषु रक्षासन्धिषु हस्ताक्षरं कृतम्। राजनाथसिंहेन कैनबरायां स्वसमकक्षेण रिचर्ड-मार्लेस इत्यमुना सह वार्ता कृता। अत्रावसरे रक्षामन्त्रिणा राजनाथसिंहेन प्रोक्तं यत् वार्ता-आतङ्कवादौ युगपत् नैव भवितुमर्हतः। उभौ नेतारौ रक्षोद्योग-साइबरसुरक्षा-समुद्रीसुरक्षा क्षेत्रीय-समाह्वानैः भारत-ऑस्ट्रेलियादेशयोः रक्षासहयोगस्य पूर्णविस्तारस्य समीक्षां अकुरुताम्। ऑस्ट्रेलियादेशस्य रक्षामन्त्रिणा प्रोक्तं यत् भारतेन सह नव-हस्ताक्षरित रक्षासन्धयः उभयोः देशयोः मध्ये सशस्त्रबलेषु सहभागितां दृढीकरिष्यन्ति। ऑस्ट्रेलिया-भारतयोः रक्षामन्त्रिणोः संयुक्तवक्तव्यानुसारं एतस्मिन् उपवेशने द्विपक्षीय रक्षाविस्तारस्य सहैव परामर्श-सहयोगयोः संवर्द्धनार्थं उभाभ्यामपि प्रतिबद्धता प्रकटिता।


प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest h|msanskr|tvartah Da|ly Sanskr|t Newspaper every day, wr|te Hello on 7876636263 Watsapp


**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**


कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११


## प्रौद्योगिक्याः लोकतंत्रीकरणेन भारतं विशिष्टेषु समावेशिराष्ट्रेषु एकम् प्रौद्योगिकीसम्पन्नं राष्ट्रम् अस्ति- प्रधानमन्त्री नरेन्द्रमोदी



हिमसंस्कृतवार्ताः - प्रधानमंत्री नरेन्द्रमोदी प्रोक्तवान् यत् देशस्य डिजिटल पारिस्थितिकी तंत्र नवाचाराय समावेशनाय च वैश्विकं मानकं संस्थापयति। मुम्बय्यां ग्लोबल-फिनटेक-फेस्ट इत्यस्य कार्यक्रमं संबोधयन् श्रीमोदी प्रोक्तवान् यत् प्रौद्योगिक्याः लोकतंत्रीकरणेन भारतं विशिष्टेषु समावेशिराष्ट्रेषु एकम् प्रौद्योगिकीसम्पन्नं राष्ट्रम् अस्ति। सः प्रोक्तवान् यत् देशे प्रतिमासं यूपीआई इत्यस्य माध्यमेन पञ्चविंशति-लक्ष-कोटिरूप्यकाणां विंशत्यर्बुदसंख्याकम् धनादानप्रदानं भवति। यूनाइटेड किंगडम इत्यस्य प्रधानमंत्री कीर-स्टारमरः इत्यसौ अकथयत् यत् ब्रिटेन-भारतदेशौ स्वाभाविक-सहयोगिनौ।

# हिमाचले संपर्कमार्गाणां पुनस्र्थापनायाः अनन्तरमेव पंचायतीराजसंस्थानां निर्वाचनम् भविष्यति, आदेशाः निर्गताः




**हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।** हिमाचलप्रदेशे पंचायतीराजसंस्थानां निर्वाचनं स्थगितम् अस्ति। राज्यसर्वकारेण आपदाप्रबन्धनविधानस्य अन्तर्गतं आदेशाः कृताः यत् सम्पूर्णे राज्ये समुचितमार्गसंपर्कस्य पुनस्र्थापनानन्तरं एव पंचायतीराजसंस्थानां निर्वाचनं भविष्यति, येन एतत् सुनिश्चितं भवति यत् जनसमूहः मतदानकर्मचारिणः च असुविधां न प्राप्नुयुः तथा च मार्गसंपर्कस्य विषयेषु कोऽपि मतदाता मतदानस्य अधिकारात् वंचितः न भवेत्। आपदाप्रबन्धनविधानम् २००२ इत्यस्य अन्तर्गतं सङ्घटितस्य राज्यकार्यकारीसमितेः अध्यक्षेन क्षतिग्रस्तमार्गाणां सार्वजनिकनिजीसम्पत्त्याः च प्रतिकूलस्थितिः च अवलोक्य एते आदेशाः निर्गताः।

## सर्वकारस्य तर्कः-

२०२५ तमस्य वर्षस्य मानसूनस्य कारणेन राज्ये व्यापकक्षतिः अभवत् इति सर्वकारेण आदेशेषु उक्तम्। राज्ये विभिन्नेषु क्षेत्रेषु प्रचण्डवृष्टौ व्यापकक्षतिः, हानिः च अभवत्। राज्यस्य विभिन्नेषु भागेषु ४७ मेघविस्फोटाः, ९८ आकस्मिकजलप्रलयः, १४८ प्रमुखानि भूस्खलनानि च ज्ञातानि। एतासु घटनासु २७० जनाः प्राणान् त्यक्तवन्तः। अस्मिन् काले मार्गदुर्घटनासु १९८ जनाः मृताः। १,८१७ गृहाणि पूर्णतया क्षतिग्रस्ताः, ८,३२३ गृहाणि आंशिकरूपेण क्षतिग्रस्तानि च। २०२५ तमे वर्षे मानसूनर्तौ ₹५,४२६ कोटिरूप्यकाणां हानिः अभवत्। अद्यापि क्षतेः अधिकांशं मूल्याङ्कनं, निवेदनीयं च अस्ति। अस्य व्यापकस्य व्यवधानस्य कारणात् सम्पूर्णं राज्यं अस्याः आपदः कारणेन भृशं प्रभावितं जातम्।

## ऋतुः अपि एकः कारकः

यतः भारतस्य ऋतुविज्ञानविभागस्य अनुसारं मानसूनोत्तर-ऋतौ सक्रियपाश्चात्यविकारैः प्रचण्डवृष्टिः भवति, अतः अधिसूचितविपदां कारणेन १३ जनानां मृत्युः अभवत् अस्मिन् काले मार्गदुर्घटनाकारणात् विंशतिः जनाः प्राणान् त्यक्तवन्तः। राज्ये पंचायतीराजनिर्वाचनं २०२५ तमस्य वर्षस्य दिसम्बरतः २०२६ जनवरीपर्यन्तं भवितुं निश्चितम् अस्ति। अस्मिन् काले राज्ये प्रचण्डहिमपातः भवति, सम्पूर्णं राज्यं शीततरङ्गेन व्याप्तम् अस्ति एतेन स्पष्टतया ज्ञायते यत् पंचायतीराजनिर्वाचनं यथानिर्धारितं न भविष्यति।

## एते उपायुक्ताः पंचायतीराज-सचिवाय पत्रं लिखितवन्तः

मण्डी, काङ्गड़ा, हमीरपुरं, शिमला इत्येतेषां उपायुक्तैः हिमाचलप्रदेशस्य पंचायतीराजसचिवस्य माध्यमेन मतदातृणां मतदानकर्मचारिणां, निर्वाचनसामग्रीणां च सुरक्षां सुनिश्चित्य आपदाप्रबन्धनविधानम् २००५ इत्यस्य अन्तर्गतं आदेशाः निर्गताः, राज्यस्य सर्वेषां च क्षतिग्रस्तमार्गाणां पुनर्स्थापनं करणीयं येन ग्रामीणक्षेत्रेषु सम्पर्कः पुनर्स्थापितः जातः चेत् पंचायतीराजनिर्वाचनं सम्भवति, जनानां बहुमूल्यं जीवनं च कस्यापि अप्रियघटनायाः रक्षणं कर्तुं शक्यते।

# ६८ तमस्य राष्ट्रमण्डल-संसदीयसम्मेलनस्य आरम्भः, यत्र ओमबिरला इत्यनेन साकं कुलदीप-पठानिया चापि सम्मिलितः



**हिमसंस्कृतवार्ताः - शिमला।** बारबाडोसस्य-राजधानी- ब्रिजटाउननगरे ६८ तमस्य राष्ट्रमण्डल-संसदीय-सम्मेलनस्य आरम्भः अभवत्। राष्ट्रमण्डलसंसदीयसम्मेलनस्य कार्यकारिणीसमित्या, बारबाडोस-संसदेन च संयुक्तरूपेण अस्य आयोजनं क्रियते। सम्मेलने ५६ देशेभ्यः प्रतिनिधयः सम्मिलिताः तत्रैव भारतीयप्रतिनिधिमण्डले राष्ट्रमण्डलसंसदीयसङ्घस्य भारतक्षेत्रस्य अध्यक्षः ओम बिरला, हिमाचलप्रदेश- विधानसभायाः अध्यक्षः कुलदीपसिंहपठानिया इत्यस्य च सहभागिता वर्तते। अनेनैव विभिन्नानां भारतीयराज्यानां विधायिकानां पीठासीनाधिकारिणः उपपीठासीनपदाधिकारिणः अपि भागं गृहीतवन्तः। अक्तूबरमासस्य ८ दिनाङ्कात् १३ दिनाङ्कपर्यन्तम् आयोज्य बारबाडोस-संसदस्य सर्वाः औपचारिकताः सम्पन्नं कृत्वा सम्मेलनस्य आरम्भः अभवत्। उद्घाटनानन्तरं सर्वैः भारतीयप्रतिनिधिभिः बारबाडोस-संसदस्य मुख्यद्वारे समूहचित्रार्थम् एकत्रिताः अभवन्। विधानसभाध्यक्षः कुलदीपसिंहपठानिया अवदत् यत् राष्ट्रमण्डले ५६ सदस्यदेशाः सम्मिलिताः सन्ति ये ब्रिटिशसाम्राज्यात् उद्भूताः सन्ति तथा च लोकतन्त्रं, शान्तिः, विकासः इत्यादीनां मूल्यानां सहभागितां कुर्वन्ति। सः अवदत् यत् एषः राष्ट्राणां स्वैच्छिकः संघः अस्ति यस्मिन् उन्नत-अर्थव्यवस्थाः, लघुद्वीपराष्ट्राणि च समाविष्टाः विविधाः देशाः सन्ति। पठानिया इत्यनेन उक्तं यत् राष्ट्रमण्डलं ५६ स्वतन्त्रराष्ट्रानां संघः अस्ति यः स्वसदस्यानां मध्ये सहकार्यं प्रवर्धयति। अस्य मूलं ब्रिटिशसाम्राज्ये अस्ति, परन्तु अद्यत्वे कोऽपि देशः राष्ट्रमण्डले सम्मिलितुं शक्नोति। राष्ट्रमण्डले अफ्रीका, एशिया, कैरिबियन, यूरोप, प्रशान्तक्षेत्रस्य च देशाः सन्ति। सम्प्रति अस्मिन् संघे उन्नताः अर्थव्यवस्थाः विकासशीलदेशाः च सन्ति। कुलदीपसिंह पठानिया शुक्रवासरे बारबाडोस संसदि भारतीयप्रतिनिधिरूपेण प्रथमं सम्बोधनं करिष्यति। सः सम्मेलनाय चयनितविषयत्रयान् भिन्नदिनेषु सम्बोधयिष्यति। पठानिया शुक्रवासरे ब्रिजटाउननगरे बारबाडोस- संसदं "लोकतन्त्रस्य समर्थनार्थम् अस्माकं संस्थानां सुदृढीकरणम्" इति विषये सम्बोधयिष्यति। सम्मेलने हिमाचलप्रदेशस्य विधानसभायाः उपाध्यक्षः विनयकुमारः, विधानसभासचिवः यशपालशर्मा च अपि उपस्थिताः भविष्यन्ति।

# जनवरी २०२६ तः आरप्स्यते एचपी-रेडी परियोजना, मुख्यमन्त्री अधिकारिभिः सह समीक्षासभाम् अकरोत्



**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः गुरुवासरे वरिष्ठाधिकारिभिः सह हिमाचलप्रदेशस्य विकासाय आपदापुनर्प्राप्त्यर्थं लचीलकार्याणि (हिमाचल प्रदेश रेजिलिएंट एक्शन फॉर डवेल्पमेंट एंड डिजास्टर रिकवरी) अर्थात् एचपी-रेडी इत्यस्याः परियोजनायाः समीक्षां कृतवान्। परियोजना जनवरी २०२६ तमे वर्षे आरभ्यते। मुख्यमन्त्री अवदत् यत् हिमाचलप्रदेशे जलवायुपरिवर्तनस्य प्रतिकूलप्रभावाः निरन्तरं वर्धन्ते, येन मानवजीवनस्य, महत्त्वपूर्णमूलसंरचनायाः च क्षतिः भवति। सः अपि अवदत् यत् नित्यं प्राकृतिकविपदः राज्यसर्वकारं क्षतिग्रस्तमूलसंरचनानां पुनर्स्थापनार्थं महत्त्वपूर्णसम्पदां समर्पयितुं बाध्यं कुर्वन्ति। मुख्यमंत्री सुक्खुः अवदत् यत् राज्यसर्वकारः विश्वबैङ्केन सह सामरिकसहकारेण एतां प्रमुखां परियोजनां कार्यान्वयति, यस्मिन् प्राथमिकतारूपेण विविधाः परियोजनाः चयनिताः सन्ति। कुलव्ययः ₹२,६८७ कोटिः अस्ति। सः अवदत् यत् एतत् मिशनं न केवलं २०२३, २०२५ च वर्षेषु राज्ये प्राकृतिकविपदानां क्षतिपूर्तिं कर्तुं महत्त्वपूर्णं सिद्धं भविष्यति, अपितु भविष्यस्य आपदः सोढुं राज्यस्य आधारभूतसंरचनायाः सुदृढीकरणे पुनर्निर्माणे च सहायकं भविष्यति।

मुख्यमन्त्री उक्तवान् यत् एचपी-रेडी परियोजनायाः उद्देश्यं जलवायुसंवेदनशीलाः पूर्वसचेतनाप्रणालीः सुदृढाः, आपदाप्रवणमार्गाः, सेतुः, भवनानि च, तटबन्धनलिकां चेत्येतेषां पुनर्स्थापनं कर्तुं वर्तते। परियोजना सुदृढां लोकसेवानां विकासं, हरितपञ्चायतानां माध्यमेन जीविकायाः अवसरानां निर्माणं, संकटाधारित-सामाजिकसुरक्षा- बीमाव्यवस्थानां सुदृढीकरणे च केन्द्रीभवति।

मुख्यमंत्री सुक्खुः कृषकाणां, फलोद्यानानां च सुविधायै आधारभूतसंरचनानिर्माणे विशेषं बलं दत्तवान् येन आपत्सु तेषां आजीविकायाः प्रभावः न भवति। सः अवदत् यत् अस्याः परियोजनायाः अन्तर्गतं कृषकाणाम् उत्पादनस्य रक्षणार्थम्, आपत्सु हानिः निवारयितुं च राज्ये दशस्थानेषु सीए भण्डाराः निर्मिताः भविष्यन्ति।

# पत्रालयः पत्राणि एव न वितरति मनांसि अपि संयोजयति -आचार्यः ललितकुमार अवस्थी



हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा। सरदारपटेलविश्वविद्यालयः मंडी इत्यस्य इतिहासविभागेन **विश्व- डाक- दिवसस्य** अवसरे विचारगोष्ठी, संवादकार्यक्रमश्च आयोजितः। कार्यक्रमे चमनकुमारः पोस्टमास्टर मंडी मुख्यातिथिः आसीत्, अपि च कार्यक्रमस्य अध्यक्षता डॉ. सनीलठाकुरः अधिष्ठाता, योजना एवं विकासः अकरोत्। डॉ. लखबीरसिंहः अधिष्ठाता शोधः, रमेशचंदः इंस्पेक्टर उत्तरक्षेत्रं, विशिष्टातिथिः पत्रवाहकः मोहनलालः आसीत्। कार्यक्रमस्य उद्देश्यं समाजे पत्रालयसेवानाम् ऐतिहासिक- सामाजिक- आर्थिकमहत्त्वविषये विचारविमर्शमासीत्। कुलपतिः आचार्यः ललितकुमार अवस्थी स्वकीये प्रेरकसन्देशे उक्तवान् यत् पत्रालयः न केवलं पत्राण्येव वितरति अपि तु जनानां मनांसि अपि संयोजयति। तेनोक्तं यत् डाकसेवा भारतं सदृशे विशालदेशे संचारस्य एव माध्यम नास्ति अपि तु भावनानां, विश्वासस्य मानवीयसम्बन्धानां सेतुः अस्ति। कार्यक्रमस्य अध्यक्षः डॉ. सुनीलठाकुरः अवदत् यत् वर्तमानकाले यत्र आभासीयसंचारः द्रुतगत्या वर्धते तत्रापि डाकविभागः स्वकीयया विश्वसनीयतापूर्ण-सेवाभावनया जनजीवने महत्वपूर्णभूमिकां निर्वाहयति। अस्मिन् अवसरे मंडी डाक विभागस्य डाकपालः (पोस्टमास्टर) चमनकुमारः मुख्यातिथिरूपेण समागत्य भारतीय डाक सेवायाः विकासः, वैश्विक पोस्टल संगठनस्य भूमिका, अस्य वर्षस्य ध्येयवाक्यं 'पोस्ट फॉर पीपल' लोकल सर्विस, ग्लोबल रीच इत्यस्मिन् विषये उक्तवान्। सः उक्तवान् यत् कथं भारतीयडाकविभागः पत्रवितरणपर्यन्तमेव सीमितः नास्ति अपि तु वित्तीयसमावेशनं, डिजिटलबैंकिंग, बीमा, ई-कॉमर्ससेवानां माध्यमेन देशस्य प्रत्येकनागरिकं प्रति स्व दायित्वं पूरयति। कार्यक्रमस्य संयोजकः, सह-अधिष्ठाता (अकादमिक), इतिहासविभागस्य विभागाध्यक्षश्च, डॉ. राकेशकुमारशर्मा अकथयत् यत् डाकविभागः न केवलं संचारस्य साधनम् अपि तु अयं भारतस्य सामाजिक-प्रशासनिकं च इतिहासं साकारं करोति। सोऽवदत् यत् अयं दिवसः सेवा- समर्पण- संवेदनशीलतामूल्यानि च पुनःस्मर्तुं अवसरं प्रददाति। अस्मिन् उपलक्ष्ये डॉ. लखबीरसिंहः अधिष्ठाता शोधः, रमेशचंदः इंस्पेक्टर उत्तरक्षेत्रं, मोहनलालः, शोधार्थी, वेदप्रकाशः, राहुल कुमारः, राजू, सूर्यप्रकाशः, दीपक दीपांशुः, मनीषः, एकता, गौरवसहितम् इतिहासविभागस्य छात्राः उपस्थिताः आसन्। कार्यक्रमे छात्राः "डाक सेवा का बदलता स्वरूप" इति विषये स्वविचारान् अपि प्रस्तुतवन्तः। 'विश्व- डाक- दिवसः' इति विषये पोस्टरप्रदर्शनमपि कृतम्। कार्यक्रमस्य समापनं धन्यवादज्ञापनेन, राष्ट्रगानेन च अभवत्।

# सर्वकारः जनसामान्यं सम्मुखीभवितुं न शक्नोति, अतः पंचायतनिर्वाचनं स्थगितम्- जयरामठाकुरः




हिमसंस्कृतवार्ताः- शिमला। पूर्वमुख्यमन्त्री विपक्षस्य नेता च जयरामठाकुरः दिसम्बरमासस्य नियतपञ्चायतनिर्वाचनस्य निरस्तीकरणविषये उक्तवान् यत् मुख्यमन्त्री सर्वकारश्च राज्यस्य जनानां सम्मुखीकरणं कर्तुं न शक्नुवन्ति। अत एव प्राकृतिक आपदः आच्छादने पंचायतनिर्वाचने विलम्बं कुर्वन्ति। सः अवदत् यत् निर्वाचनस्य परिणामं सर्वकारः पूर्वमेव जानाति, काङ्ग्रेसस्य कृते मर्दनपराजयः निश्चितः इति। एतादृश्यां परिस्थितौ प्रथमं ते नगरनिगम-नगरपरिषद्- निकायनिर्वाचनं परिहरन्ति स्म, अधुना पंचायतनिर्वाचनमपि स्थगितवन्तः। आपदानामधेयेन ते प्रथमं मण्डलोपायुक्तान् पत्राणि लेखितुं प्रेरितवन्तः, तत्क्षणमेव निर्वाचनं स्थगितम्। सर्वं सर्वकारेण एव निर्धारितम् आसीत्। आपदानामधेयेन सर्वकारः निर्वाचनं स्थगयति, परन्तु ईश्वरस्य दयायाः कारणात् अत्यन्तं आपदाग्रस्तान् जनान् त्यक्तवान्। सर्वकारेण स्वविफलतानां पलायनस्य स्थाने जनसामान्यं सम्मुखीकृत्य निर्धारितसमये निर्वाचनं करणीयम्।

# प्रधानमंत्रिणा नरेंद्र-मोदिना अमेरिकायाः राष्ट्रपतिना डोनाल्ड ट्रंपः इत्यनेन प्रस्तावितायाः शांति-योजनायाः प्रथमचरणस्य अन्तर्गतं इजरैल-हमासयोः मध्ये हस्ताक्षरितस्य सहमतिपत्रस्य स्वागतं कृतमस्ति

हिमसंस्कृतवार्ताः - प्रधानमंत्रिणा नरेन्द्र-मोदिना अमेरिकायाः राष्ट्रपतिना डोनाल्ड ट्रंपः इत्यनेन प्रस्तावितायाः शांति-योजनायाः प्रथमचरणस्य अन्तर्गतं इजरैल-हमासयोः मध्ये हस्ताक्षरितस्य सहमतिपत्रस्य स्वागतं कृतमस्ति । एकस्मिन् सामाजिकसंदेशे श्रीमोदी आशां प्रकटितवान् बंधकानां विमोचनेन गाजाक्षेत्रस्य जनेभ्यः मानवीय सहायतायां वृद्धिना च ते लाभान्विताः भविष्यन्ति । अनेन स्थायि-शांत्याः मार्गम् अपि प्रशस्तं भविष्यति । सः प्रोक्तवान् यत् एतत् साहमत्यम् इज्रैलदेशस्य प्रधानमन्त्रिणः बेंजामिन नेतन्याहू इत्यस्य सुदृढ-नेतृत्वस्य अपि प्रतीकम् अस्ति । इतः पूर्वं अमेरिकायाः राष्ट्रपतिः डोनाल्ड ट्रंपः घोषणाम् अकरोत् यत् इज्रैल-हमासौ गाजाक्षेत्रे युद्धविरामं कर्तुं बंधकान् विमोचयितुं च अमेरिकायाः शान्तियोजनायाः प्रथमचरणे सहमतौ अभवताम् येन वर्षद्वयपूर्वस्य युद्धं समाप्तम् अभवत् । अवधेयं यत् ट्रंपवर्यस्य इयं घोषणा मिस्रदेशस्य शर्म-अल-शेख इत्यत्र एकस्य दिवस्य विशदवार्तायाः अनन्तरं अभवत्




# Mandi News- 11 दिनाङ्के करसोगम् आगमिष्यति मुख्यमंत्री सुक्खुः



हिमसंस्कृतवार्ताः- मण्डी। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः मण्डीमण्डलस्य करसोगक्षेत्रस्य दिवसव्यापी भ्रमणार्थम् आगच्छति। अस्मिन् भ्रमणकाले मुख्यमन्त्री करसोगक्षेत्रस्य जनानां समक्षं विविधाः विकासात्मकाः परियोजनाः समर्पयिष्यति। मण्डीजनपदस्य उपायुक्तेन अपूर्वदेवगनेन उक्तं यत् मुख्यमन्त्री ११ अक्तूबरदिनाङ्के प्रातः ११ वादने करसोगक्षेत्रस्य कुन्हों- चक्रविमानस्थले आगमिष्यति, ततः करसोगस्य संयुक्तकार्यालयभवनं प्रति प्रस्थास्यति। मुख्यमन्त्री विभिन्नविभागानाम् अन्तर्गतविकासात्मकपरियोजनानाम् उद्घाटनं, आधारशिलास्थापनं च करिष्यति। अस्मिन् अवसरे मुख्यमन्त्री जनसभाम् अपि सम्बोधयिष्यति, जनविषयान् सम्बोधयिष्यति च।

# करकचतुर्थी : श्रद्धायाः प्रेमस्य च प्रतीकः





डॉ महिमा शुक्ला

भारतीयसंस्कृतौ बहवः पर्वोत्सवाः सन्ति, ये केवलं धार्मिकाः न भवन्ति, किन्तु जीवनस्य प्रत्येकं सम्बन्धं प्रगाढत्वं पावनत्वं च ददति। तेषु प्रमुखः पर्वः अस्ति करकचतुर्थी इत्याख्यः, यः मुख्यतया सुहागिन्याः स्त्रियः पतिलम्बायुषः, दाम्पत्यसौख्यस्य च प्रार्थनायै आचरन्ति।

एषः व्रतः केवलं उपवासस्य नाम न, अपि तु दाम्पत्ययोः मध्ये श्रद्धा, त्यागः, प्रेम च इत्येतस्य प्रतीकः। दिवसम् अन्नजलत्यागेन व्रतमाचर्य, सायं काले सोलहशृङ्गारेण सज्जिता सुहागिनी चन्द्रमसः पूजनं कृत्वा, पतिहस्तेन जलं ग्रहणं करोति। एवं व्रतपालनं केवलं पतिलम्बायुषः प्रार्थनार्थं न, अपि तु सम्बन्धस्य दृढत्वं शाश्वतत्वं च सूचयति।

पुराकाले कथ्यते यत् स्त्रियः करकनाम्ना घटे जलेन पूरिते यमधर्मराजं प्रति प्रार्थना अकुर्वन्, यत् पतिलम्बायुषः भविष्यति। शनैः शनैः एषा प्रथा उत्सवस्वरूपेण विकसितवती। भारतीयसंस्कृतौ चन्द्रमाः शीतलतायाः, सौन्दर्यस्य, शान्तेः च प्रतीकः मन्यते। अतः करकचतुर्थ्यां चन्द्रपूजनस्य विशेषं माहात्म्यम् अस्ति। आधुनिकसमये अपि एषः पर्वः अतीव प्रासंगिकः। अद्य पतयः अपि स्वपत्नीणां दीर्घायुषः, सौख्यस्य च प्रार्थनायै उपवासं कुर्वन्ति। एतत् परस्परं सम्मानं समानता च दर्शयति। सहधर्मपत्नीनां सङ्गमः, शृङ्गारस्य आनन्दः, परम्परायाः आदानप्रदानं च एतस्मिन् दिने विशेषतः दृश्यते। एषः पर्वः स्मारयति यत् दाम्पत्यसम्बन्धः केवलं सामाजिकः न वा शारीरिकः न, किन्तु आध्यात्मिकः मिलनः, सप्तजन्मपर्यन्तं बन्धनं च अस्ति।पत्नीव्रतम्, पतिस्नेहः—एतयोः संयोगः एव एषं सम्बन्धं अखण्डनीयम् करोति

करकचतुर्थी केवलं प्रथा न, किन्तु प्रेमस्य, विश्वासस्य, समर्पणस्य च जीवन्-उदाहरणम्। अयं पर्वः शिक्षयति यत् यदा सम्बन्धेषु श्रद्धा त्यागः च संलग्नौ भवतः, तदा बन्धनं युगयुगान्तरं यावत् अक्षुण्णं तिष्ठति।

# चतुर्धामयात्रा 2025 -केदारनाथे २०२४ संवत्सरस्य कीर्तिमानम् अभिनत्,

## श्रद्धालूनां संख्या 16.56 लक्षम् अतीताः




हिमसंस्कृतवार्ताः- देहरादूनम्।

चतुर्णां धाम्नां यात्रा 2025तमे वर्षे शक्तिमती आरब्धा। वर्षा हिमवृष्टिः च अपि, श्रद्धालुषु यात्रायाः प्रति महान् उत्साहो दृष्टः। अद्यतने संवत्सरे केदारनाथ यात्रा नवमं कीर्तिमानं स्थापितवती। बुधवासरे केदारनाथधाम्नि श्रद्धालूनां संख्या 16 लक्ष 52 सहस्रातीता अभवत्, यदा धाम्नः कपाटपिधाने 14 दिनानि अवशिष्टानि। गतवर्षे सम्पूर्णयात्राकाले 16,52,076 श्रद्धालवः केदारनाथदर्शनाय आगताः। बुधवासरे केदारनाथधाम्नि 5,614 श्रद्धालूनां दर्शनं सम्पूर्णम् अभवत्। केदारनाथधाम्नः कपाटाः भ्रातृद्वितीया दिने, अर्थात् 23 अक्तूबर 2025 मध्ये, पिधास्यन्ते। बद्रीनाथ, गंगोत्री च यमुनोत्री धामसु अपि यात्रिणां संख्या निरन्तरं वर्धमानास्ति। प्रदेशसरकारः श्रद्धालूनां सुरक्षा यथावत् यात्रायाः सुरक्षितता सुनिश्चितुं सर्वाणि अपेक्षितानि व्यवस्थाः सम्पादितवती। यात्रामार्गेषु सुरक्षा सैनिकाः नियुक्ताः, भूस्खलन-संवेदनशीलेषु स्थानानि जेसीबी प्रयोगेण शोधनं क्रियते। यात्रिणः निरन्तरं वातावरणानुकूलं सावधानं भवितुं निर्देशाः प्रदत्ताः।

अद्यतने संवत्सरे गंगोत्री तथा यमुनोत्रीधाम्नः कपाटाः 30 अप्रैल 2025 मध्ये उद्घाटिताः। केदारनाथकपाटाः 2 मई तथा बद्रीनाथकपाटाः 4 मई 2025 मध्ये सामान्यश्रद्धालूनां दर्शनार्थं उद्घाटिताः। वर्षापवनकाले अतीव वर्षा भूस्खलन च यात्रां किंचित् बाधितवन्तः, किन्तु प्रशासनस्य तत्परता युद्धसमरवत् कार्यसिद्धिः मार्गाणि पुनः सुचारुं कृतवान्। मुख्यमन्त्री पुष्करसिंह धामी सर्वेभ्यः जिलाधिकारिभ्यः निर्देशं दत्तवान् यत् श्रद्धालूनां च स्थानीयनागरिकानां सुरक्षा सर्वोपरि प्राथमिकता भवेत्। यदापि आपत्कालीनावस्था स्यात् तदा शीघ्रं रक्षणम् उद्धारकार्यं च आरभ्यते।

अस्मिन् पावने अवसरे ज्योतिष्पीठ शङ्कराचार्य धर्माधिकारी ज्योतिषाचार्य डॉ. रमेशचन्द्र पाण्डेय तथा डॉ. एस. पी. पाण्डेय सपरिवार भागं गृह्णीयुः तथा बद्रीकेदारस्य यात्रां सम्पूर्णां कृतवन्तः।सममेव ममतापांडेयः रौनकः, समृद्धिश्चासन्। तत्तेषां सपरिवारं दर्शनलाभद्वारा गौरवं च शोभां च वर्धितवन्तः।

# "वन्दे संस्कृतमातरम्" "लौकिकन्यायकोशः" "गोदोहनन्यायः"



गौः रक्षिता चेत् तस्याः दोहनमपि क्रियते इति यस्य कस्यापि मुख्यविषयस्य गौणविषयेण सह सम्बन्धो भवति चेत् अस्य न्यायस्य प्रयोगो भवति। यथा-

(१) महाव्रतविधाने काम्यसूक्तानां पुरुषार्थत्वेन सम्बन्धो भवति क्रत्वर्थत्वेन न

{जैमिनिसूत्रं- शाबरभाष्यम् ४-१-२}

(२) तस्माद् यथा क्रत्वाश्रयाण्यपि गोदोहनादीनि फलसंयोगाद् अनित्यानि। एवं उद्गीथाद्युपासनान्यपीति द्रष्टव्यम्। अत एव कल्पसूत्रकारा नैवंजातीयकानि उपासनानि क्रतुषु कल्पयांचक्रुः।।

{ब्रह्मसूत्रशाङ्करभाष्ये-३-३-४२}।

डा. वर्षा प्रकाश टोणगांवकर
पुणे/ महाराष्ट्रम्

# पति- पत्न्योः मध्ये हास- परिहासम्



**पत्नी** = कुत्र लिखितम् अस्ति यत् भार्यया एव प्रतिदिनं त्रिवारं भोजनम् अन्नं च पचनीयम्।

**पतिः**- अधिनियमे लिखितम् अस्ति।

**पत्नी**= कस्मिन् अधिनियमे लिखितम् अस्ति? एतादृशं वदन् त्वं पलायितुं न शक्नोषि।

**पतिः**- अहं कुत्र पलायनं करोमि? प्रथमं प्रतिज्ञां कुरु यत् यदि अहं वदामि तर्हि त्वं मौनम् एव तिष्ठसि, विवादं न करिष्यसि।

**पत्नी**- अहं प्रतिज्ञां करोमि।

**पतिः**- लिखितम् अस्ति - कारागारपालः बन्दिनेभ्यः भोजनं प्रदास्यति।

**पत्नी** 😡😡😡😡😡😡😡